मु[1]पसर्जनकार्यं वर्जयित्वा। 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' (वा. १३३९/७८०)। पूर्वपदे नानाविभक्ति[2]केऽप्युत्तरपदं पञ्चम्यन्तमेव [3]भवति। निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः। [4]निष्क्रान्तं कौशाम्ब्या निष्कौशाम्बिम्। निष्क्रान्तेन कौशाम्ब्या निष्कौशाम्बिना। [5]निष्क्रान्ताय कौशाम्ब्या निष्कौशाम्बये। निष्क्रान्तात् कौशाम्ब्या निष्कौशाम्बेः। निष्क्रान्तस्य कौशाम्ब्या निष्कौशाम्बेः। निष्क्रान्ते कौशाम्ब्या निष्कौशाम्बौ। [6]एवं निर्वाराणसिः। [7]एकविभक्ति इति किम्? राजकुमारी। अपूर्वनिपाते इति किम्? न हि भवति [8]कौशाम्बीनिः इति ॥

## अर्थवदधातुरप्रत्ययः प्रातिपदिकम्। (४५/१७८)

अभिधेयवचनोऽर्थशब्दः। अर्थवच्छब्दरूपं प्रातिपदिकसञ्ज्ञं भवति [9]धातुप्रत्ययौ वर्जयित्वा। [10]डित्थः। [11]कपित्थः। कुण्डम्। [12]पीठम्। [13]अर्थवत् इति किम्? वनम्, धनम् इति नान्तस्यावधेर्मा भूत्। [14]नलोपो हि स्यात् (८.२.७/२३६)। अधातुः इति किम्? हन्ते[15]र्लङ। अहन्। नलोपः [16]स्यात्। अप्रत्ययः इति किम्? काण्डे। [17]कुडचे (म. भा. १. २१७)। 'ह्रस्वो नपुंसके प्रातिपदिकस्य' (१.२.४७/३१८) इति [18]ह्रस्वः स्यात्। [19]अनर्थकस्यापि निपातस्य प्रातिपदिकसञ्ज्ञा [20]इष्यते (म.भा. १.२२०)। अध्यागच्छति। प्रलम्बते। प्रातिपदिकप्रदेशाः—'ह्रस्वो नपुंसके प्रातिपदिकस्य' (१.२.४७/३१८) इत्येवमादयः ॥

## कृत्तद्धितसमासाश्च। (४६/१७९)

[21]कृतस्तद्धिताः समासाश्च प्रातिपदिकसञ्ज्ञा भवन्ति। अप्रत्ययः इति [22]पूर्वत्र पर्युदासात् कृदन्तस्य तद्धितान्तस्य चानेन प्रातिपदिकसञ्ज्ञा विधीयते। अर्थवत्समुदायानां समासग्रहणं नियमार्थम् (म.भा. १.२२२)। कृत्—कारकः। [23]हारकः। कर्ता। [24]हर्ता। [25]तद्धितः—औपगवः। [26]कापटवः। समासः—राजपुरुषः। [27]ब्राह्मणकम्बलः। समासग्रहणस्य नियमार्थत्वाद् [28]वाक्यस्यार्थवतः सञ्ज्ञा न भवति[29] ॥

## ह्रस्वो नपुंसके प्रातिपदिकस्य। (४७/३१८)

नपुंसकलिङ्गेऽर्थे यत् प्रातिपदिकं वर्तते तस्य ह्रस्वो भवति आदेशः[30] अलोऽन्त्यस्य [31]अचः। अतिरि कुलम्[32]। [33]अतिनु कुलम्। नपुंसके इति किम्? ग्रामणीः। सेनानीः। प्रातिपदिकस्य इति किम्? काण्डे तिष्ठतः। [34]कुडचे तिष्ठतः। प्रातिपदिकग्रहणसामर्थ्यात् एकादेशः पूर्वस्यान्तवन्न भवति ॥

## गोस्त्रियोरुपसर्जनस्य। (४८/६५६)

प्रातिपदिकस्य इति वर्तते। गो इति [35]स्वरूपग्रहणं, स्त्री इति प्रत्ययग्रहणं स्वरितत्वात्। उपसर्जनग्रहणं तयोर्विशेषणम्। गोरुपसर्जनस्य स्त्रीप्रत्ययान्तस्यो[36]पसर्जनस्य इति। [37]ताभ्यां प्रातिपदिकस्य तदन्तविधिः। उपसर्जनगोशब्दा-

---

1. उपसर्जनसञ्ज्ञाकार्यं ह. 2. °युक्ते फ, °विभक्तेऽपि ब. 3. भवति नास्ति फ. 4. उदाहरणमिदं नास्ति फ. 5. निष्क्रान्ताय—राजकुमारी नास्ति ह. 6. एवं नास्ति क.ड. 7. एकविभक्ति—राजकुमारी नास्ति ड. ग. 8. कौशाम्बिनिः ब. क. ड. 9. धातुप्रत्ययान्तं च वर्जयित्वा ह. 10. अर्थः फ. 11. डवित्थः ब. क. ड, डिवित्थः फ. 12. नास्ति ह. 13. अर्थवद्ग्रहणं ह. 14. वाक्यमिदं नास्ति ब. 15. लङि क, लिङि ह. 16. हि इत्यधिकम् ह. 17. कुण्डे ग. 18. ह्रस्वत्वं ग. ह. 19. अनर्थकस्य—प्रलम्बते नास्ति क. फ. ग. ह. 20. वाच्या ड. 21. कृदन्ताः तद्धितान्ताः समासान्ताश्च ग.ह. 22. पूर्वत्र नास्ति क, पूर्वपर्युदासात् ड, पूर्वसूत्रेण ह. 23. नास्ति अ.क.ड.फ. 24. नास्ति ड.फ. 25. तद्धितः नास्ति अ.ग. 26. नास्ति अ.ग. 27. नास्ति अ. 28. वाक्यस्य ब, वाक्यस्यार्थवतः प्रातिपदिकसञ्ज्ञा ड. फ. क. 29. देवदत्त गामभ्याज शुक्लां दण्डेनेति इत्यधिकम् ग. ह. 30. स च इत्यधिकम् ग. 31. अचः नास्ति फ. ग. ह. 32. अतिकुलं इत्यधिकम् ह. 33. अतिनु जलम् अ, उदाहरणमिदं नास्ति ग. 34. कुण्डे क. ड. 35. शब्दस्वरूप° ड. 36. चोप° ड. 37. द्वाभ्यां ग.